प्र.1 आचार्यचतुर्थसत्राधम् (द्वितीयपटलम्)

1. चातुर्मास्यकर्मणाम् आरम्भः कस्मिन् काले कर्तव्यः ?

(उ.) फाल्गुन्यां पौर्णमास्याम् ।

2. चातुर्मास्यशब्देन कानि कर्माणि अभिधीयन्ते ?

(उ.) वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयसंज्ञकानि चत्वारि पर्वाणि।

3. वैश्वदेवपर्वणि कति हवींषि भवन्ति ?

(उ.) अष्टौ हवींषि ।

4. 'कुशप्रस्वः' पदस्य कोऽर्थः ?

(उ.) पुष्पिताः कुशाः ।

5. वैश्वदेवपर्वणि कति प्रयाजाः कति चानुयाजाः भवन्ति ?

(उ.) नवप्रयाजाः, नव अनुयाजाः

6. पशुयागे कति समिष्टयजूंषि भवन्ति ?

(उ.) त्रीणि ।

7. 'त्र्यायुषम्' इति मन्त्रः केन जप्यते ?

(उ.) यजमानेन ।

8. शुनासीरीयपर्वसमाप्तौ वपनं भवति आहोस्वित् न ?

(उ.) न भवति ।

9. प्रजाकामस्य यजमानस्य किं पर्व विहितम् ?

(उ.) वैश्वदेवं पर्व ।

10. 'मध्वाशी' पदस्य कोऽर्थः ?

(उ.) मधुमिश्रान्नभोजी ।

11. 'ऋतुजायोपायी' इति शब्दस्य कोऽर्थः ?

(उ.) ऋतुकाले भार्यागमनवान् ।

12. 'उदकाभ्यवायः' इति पदस्य कोऽर्थः ?

(उ.) उदकमध्ये प्रवेशः ।

Scanned by CamScanner

13. 'आग्नेय मथ्यमानाय०' इति वाक्येन अध्वर्युः किं करोति?

(उ.) होतारं सम्प्रेष्यति।

14. 'आग्नेय प्रह्रियमाणाय०' इति वाक्येन अध्वर्युः कस्मिन् समये होतारं प्रेष्येत् ?

(उ.) आहवनीयाग्नौ जातस्य अग्नेः प्रक्षेपं करिष्यन्।

15. दध्ना संयुक्तानां सक्तूनां किम् नाम ?

(उ.) करम्भः।

16. यजमानगृह्याः के भवन्ति ?

(उ.) प्रजापशुभृत्यभार्यादयः। केवलं प्रजाः वा।

17. 'मेषमिथुनम्' इति पदस्य कोऽर्थः।

(उ.) मेषप्रतिकृतिः मेषीप्रतिकृतिश्च

18. कतिप्रकाराः ऊर्णाः भवन्ति ?

(उ.) द्विप्रकाराः — ऐडक्यः अनैडकयश्च।

19. वरुणप्रघासे कस्मात्प्राक् द्वे वेदी करोति ?

(उ.) आहवनीयोद्धरणात्प्राक्।

20. वरुणप्रघासे उत्करः कुत्र कर्तव्यः ?

(उ.) उत्तरवेदिसमीपे।

२१. वरुणप्रघासे प्रतिप्रस्थातुः सञ्चरः कुत्र भवति ?

(उ.) उत्तरवेदिम् अपरेण।

२२. 'चात्वाल'-शब्दस्य कोऽर्थः ?

(उ.) नियतपरिमाणसंस्कृतः गर्तः।

२३. चात्वालमानार्थं शम्यां प्रथमतः कुत्र निदध्यात् ?

(उ.) उत्करात्पूर्वस्यां दिशि।

२४. 'तप्तायनी' इति मन्त्रेण स्फ्येन किं करोति ?

(उ.) अन्तर्लिखति।

Scanned by CamScanner

25. "अग्ने अङ्गिरः" इत्यनेन अध्वर्युः किं करोति ?

(उ.) हस्तेन स्फ्येन च पुरीषं हरति।

26. 'यजमानदशपद्या' इति पदस्य कोऽर्थः ?

(उ.) यजमानस्य दशपदमिता।

27. वरुणप्रघासे अध्वर्युः कियत्प्रमाणां नाभिम् उत्तरवेदिमध्ये करोति ?

(उ.) प्रादेशप्रमाणाम् एकाङ्गुलोच्चां चतुष्कोणाम् च।

28. "दध्ना वसति" अस्मिन् सूत्रे प्रयुक्तस्य 'वसति' इति क्रियापदस्य कोऽर्थः ?

(उ.) आच्छादयति।

29. "सर्वं वा विभज्य प्राकृतत्वात्" सूत्रेऽस्मिन् सर्वशब्देन किम् अभिप्रेतम् ?

समग्राहवनीयाग्निः।

30. "प्रणयनं वा सोमाद्वाच्यत्वात्" अत्र 'वाच्यत्वात्' इत्यस्य पदस्य कोऽर्थः ?

(उ.) विधीयमानत्वात्।

31. 'गृहणं गुणार्थम् उत्तरवेद्यग्निविधानात्' कस्य गृहणं गुणार्थं भवति ?

(उ.) प्रणयनस्य।

32. "त्रिस्क्तायां यथावेदि हरणम्" सूत्रेऽस्मिन् कस्य (कयोः) हरणं विहितम् ?

(उ.) अग्न्योः हरणम्।

33. वरुणप्रघासे कः ऋत्विक् उत्तरवेदिं प्रोक्षति ?

(उ.) अध्वर्युः।

34. "भूतेभ्यस्त्वेति स्रुचमुद्यच्छति" अत्र 'उद्यच्छति' पदस्य कोऽर्थः ?

(उ.) ऊर्ध्वां करोति।

35. 'अग्नेः पुरीषम्' इत्यनेन गुग्गुल्वादीन् कुत्र निदध्यात् ?

(उ.) नाभेः उपरि।

36. 'उद्धतावोक्षिते दक्षिणम्' अत्र दक्षिणशब्देन कस्य निर्देशः ?

(उ.) दक्षिणाग्नेः।

37. 'उपयमनी'- शब्दस्य कोऽर्थः ?

(उ.) अग्नेरुपयमने उपयुक्ताः सिकताः।

38. "दक्षिणं प्रतिप्रस्थातुः" सूत्रस्य अर्थः कः ?

(उ.) निर्वापे अधिश्रयणे च प्रतिप्रस्थातृसंज्ञकस्य ऋत्विजः आज्यं दक्षिणतः भवेत्।

39. "नानाऽऽज्यनिर्वपणम्" इति सूत्रस्य कोऽर्थः ?

(उ.) आज्यनिर्वापः पृथक्पृथक् उभयार्थं भवति।

40. 'औपभृतासादनम्' अस्य एकपदात्मकस्य सूत्रस्य विग्रहः कः ?

औपभृतम् आसादनम् (उपभृत्सम्बन्धि आसादनम्)।

41. 'वाजिने निषिच्य' इति सूत्रस्य कोऽर्थः ?

(उ.) यथास्वं पयस्ययोर्वाजिने पृथक्पात्रयोः अवस्थापयेत्।

42. 'मेषमिथुनं च' सूत्रेऽस्मिन् मेषमिथुनस्य कुत्र प्रक्षेपः विहितः ?

(उ.) पयस्ययोः।

43. आज्यभागानन्तरं कः स्रुक्पाणिः आस्ते ?

(उ.) प्रतिप्रस्थाता।

44. अध्वर्युः इडाम् आदाय कस्मै समर्पयति ?

(उ.) प्रतिप्रस्थात्रे।

45. 'स्रुचौ व्यूहतोऽध्वर्यू' अत्र द्विवचनान्त-'अध्वर्यू'-पदेन कतमौ ऋत्विजौ ग्राह्यौ?

(उ.) अध्वर्युप्रतिप्रस्थातारौ।

46. मैत्रावरुणः केन प्रकारेण भक्षेष्वधिकारी भवति ?

(उ.) होत्रध्वर्युविकारात्।

47. वरुणप्रघासे गार्हपत्ये तूष्णीं किं कर्म कुर्यात् ?

(उ.) समिदाधानम्।

48. कौ पशू वरुणप्रघासकर्मणः दक्षिणात्वेन विहितौ ?

(उ.) धेनुः अश्वश्च।

Scanned by CamScanner

49. 'कार्तिक्यां साकमेधा द्व्यहम्' इति सूत्रस्य अर्थः कः ?
(उ.) कार्तिक्यां पौर्णमास्यां तत्पूर्वदिने च साकमेधाः कर्तव्याः ।

50. साकमेधकर्मणि कस्यै देवतायै चतुर्दश्यां पूर्वाह्णे पुरोडाशः कार्यः ?
(उ.) अग्नये अनीकवते (अष्टाकपालः पुरोडाशः)

51. 'बर्हिरनुप्रहरणवर्जं वा' अस्य सूत्रस्य कोऽर्थः ?
(उ.) अथवा बर्हिर्होममात्रं वर्जयित्वा अन्यत्सर्वं कर्मापवर्गान्तं कर्तव्यम् ।

52. "आसेचने मध्ये कृत्वा०" अस्मिन् सूत्रे 'आसेचने' पदस्य कोऽर्थः ?
(उ.) आसिच्यते=प्रक्षिप्यते घृतम् अनयोः इति आसेचने (गर्तौ इत्यर्थः) ।

53. आज्यभागवत्समवदानौ कौ भवतः ?
(उ.) गृहमेधिनस्विष्टकृतौ ।

54. "पूर्वे मार्जनमुपहूय" सूत्रेऽस्मिन् कस्य उपाह्वानं संकेतितम् ?
(उ.) इडायाः ।

55. मरुद्भ्यः क्रीडिभ्यः कतिकपालः पुरोडाशः विहितः ?
(उ.) सप्तकपालः ।

56. पितृयज्ञे सर्वं प्रैषादिकं केन प्रकारेण कर्तव्यम् ?
(उ.) उपांशु ।

57. पितृभ्यः बर्हिषद्भ्यः हवीरूपेण किम् अर्प्यते ।
(उ.) धानाः ।

58. "अपबर्हिषः प्रयाजा अनुयाजाश्च" अत्र 'अपबर्हिषः' पदस्य कोऽर्थः ?
(उ.) बर्हिर्वर्जिताः ।

59. "प्रत्यगतीत्य जुहोति" अत्र 'प्रत्यक्' शब्दस्य कः अर्थः ?
(उ.) प्रतीच्यां दिशि ।

60. बर्हिः परिधीन् च कदा अग्नौ प्रक्षिपेत् ?
(उ.) बर्हिर्होमकाले ।

61. किमर्थं त्रैयम्बकान् अवसहकारान् प्रतीयात् ?
(उ.) यतः त्रैयम्बकाः जुहोतयः ।

Scanned by CamScanner

62. "मूतयोः कृत्वा वेणुयष्ट्याम्" एतेऽस्मिन् मूत-शब्दस्य अर्थः कः?
(उ.) यत्र तृणमये आवपने धान्यं बध्यते तन्मूतम्।

63. शुनासीरीये वायव्यं हविः किम्?
(उ.) पयः।

64. "ओष्टारौ वा" अत्र 'ओष्टारौ' पदस्य कोऽर्थः?
(उ.) वोढारौ महान्तौ बलीवर्दौ।

65. "वैश्वदेवः पशुः" अस्य सूत्रस्य कोऽर्थः?
(उ.) वैश्वदेवपर्वणि सपशुके विश्वेभ्यः देवेभ्यः पशुः कार्यः।

66. महाहविषि किंदेवत्यः पशुर्भवति?
(उ.) माहेन्द्रः।

67. श्रीराष्ट्रमित्राऽऽयुष्कामस्य विहितायाः इष्टेः किं नाम?
(उ.) मित्रविन्देष्टिः।

68. मित्रविन्देष्टौ कति हवींषि भवन्ति?
(उ.) दश हवींषि।

69. "विराजौ संयाज्ये" अत्र 'संयाज्ये' इति पदेन के अभिधीयेते?
(उ.) स्विष्टकृद्यागस्य याज्यानुवाक्ये।

70. मित्रविन्देष्टेः दक्षिणा का?
(उ.) दश गावः सहस्रं वा गावः।

Scanned by CamScanner

(1) "आग्नेयः सौम्यश्चरुः, सावित्रो द्वादशकपालोऽष्टाकपालो वा, सारस्वतश्चरुः, पौष्णश्चरुः प्रपिष्टानाम्" सूत्रमिदं व्याख्यायताम्।

उ. चातुर्मास्येषु अन्यतमे वैश्वदेवपर्वणि अग्निमष्टाकपालेन पुरोडाशेन, सोमं चरुणा, सवितारमष्टाकपालेन द्वादशकपालेन वा पुरोडाशेन, सरस्वतीं चरुणा, पूषणं पिष्टमयेन चरुणा यजेत्। अस्मिन् कर्मणि सवितृदेवतासम्बद्धः पुरोडाशः पृथुतरः करणीयः। सावित्रपुरोडाशपृथुतरताविषये श्रुतिरस्ति "स वै वर्षिष्ठः पुरोडाशो भवति"। पुरोडाशोऽयम् उपांशु कार्यः। सूत्रेऽस्मिन् प्रयुक्तस्य 'सारस्वतः' इति पदस्य द्वेधा विग्रहः कर्तुं शक्यते - सरस्वान् देवता अस्य, सरस्वती वा देवता अस्य। अत्र "योषा वै सरस्वती" इति श्रुतिबलेन सरस्वती एव देवता।

(2) "द्विदेवतोऽपि नियमसामर्थ्यात्" सूत्रमिदं व्याख्यायताम्।

उ. राजसूयप्रकरणे "ऐन्द्रापौष्णश्चरुः" इति द्विदेवत्यः चरुः विहितः। स चरुः पैष्टः उत न? अस्मिन् सन्देहे प्रवृत्ते पूर्वपक्षरूपमिदं सूत्रमुपन्यस्तम्। अस्याशयः एवंविधः - यत्र देवतान्तरसहितः पूषा तत्रापि पिष्टानामेव चरुः कार्यः। कुतः? पूष्णः नियमेन पिष्टताविधानात्। अयं नियमः श्रुतिप्रतिपादितः - "तस्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामेव कुर्वन्ति"। अन्यस्येन्द्रादेः तु अनियमः। नियमानियमयोः नियमस्य एव बलवत्ता स्वीक्रियते। अतः द्विदेवतोऽपि चरुः प्रपिष्टानामेव भवति। अन्याभ्यामपि द्वाभ्यां सूत्राभ्याम् - "अर्थपिष्टं वोभयसामर्थ्यात्", "सौमापौष्णदर्शनाच्च" पूर्वपक्षमुद्भाव्य उत्तरेण सूत्रद्वयेन सिद्धान्तपक्षोऽनुविहितः।

Scanned by CamScanner

(3) "गृहेषु पौर्णमासं समारूढनिर्मथितयोस्तथा चेत्." सूत्रमिदं व्याख्यायताम्।

(उ.) यत्र समारोपनिर्मन्थनयोर्विधानं तत्र ते कृत्वा तादृशे अग्नौ पर्व अनुष्ठाय पुनः समारोपनिर्मन्थने कृत्वा तत्र पौर्णमासानुष्ठानं वरुणप्रघासेषु साकमेधेषु च। वैश्वदेवकर्मणि तयोरविहितत्वात् प्राकृतने एव गार्हपत्ये वैश्वदेवपर्व अनुष्ठाय तत्रैव पौर्णमासं कुर्यात्। पर्वसमाप्तेः अनन्तरं समारूढनिर्मथितयोः अग्न्योः पर्व कृतं चेत् अग्नी समारोप्य पर्वकरणप्रदेशात् आगत्य गृहेषु अग्नी मथित्वा तत्र पौर्णमासं कुर्यात्। वरुणप्रघाससाकमेधयोः विषये श्रुतिरस्ति "गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजेत"। अस्माद्धेतोः पर्वद्वयान्ते एव अग्निसमारोपं मन्थनं च कृत्वा पौर्णमासानुष्ठानम्। वैश्वदेवशुनासीरीयान्ते तु न समारोपः नापि मन्थनम् अपितु गार्हपत्यं स्वस्थानमानीय पौर्णमासानुष्ठानं कुर्यात्।

(4) "सोमे वोत्तरे व्यपस्फुरणश्रुतेरसम्भवाच्च" सूत्रमिदं व्याख्यायताम्।

(उ.) 'युगमात्रीम्', 'यजमानदशपद्यां वा' इति अन्तिमे द्वे उत्तरवेदिप्रमाणे सोमे एव वेदितव्ये नान्यत्र। कुतः? "व्यपस्फुरेते वा एते वेदिश्चोत्तरवेदिश्च" इत्यं व्यपस्फुरणश्रुतिरस्ति। व्यपस्फुरणं स्पर्धा। स्पर्धा उत्तरवेदेः अतिमहत्त्वात् उपजायते। यत्र महावेदेः अतिमहत्त्वं तत्रैव स्पर्धा युज्यते। यथा सोमे। अत्र तु तथात्वाभावात्। षडरत्निप्रमाणाया वेद्या सह उत्तरवेदेः स्पर्धाकरणाभावात्। "उत्तरस्यां वेदावुत्तरवेदिं निवपति" इति उत्तरवेद्याधारत्वेन वेदिः श्रूयते। न हि षडरत्निपरिमाणा वेदिः दशपद्यायाः उत्तरवेदेः आधारः भवितुम् अर्हति। अतः अन्तिमे द्वे वेदिप्रमाणे सोमे एव सम्भवतः।

Scanned by CamScanner

(5) "व्रतोपायनं वाङ्कृतं चेत्" सूत्रमिदं व्याख्यायताम् ।

(उ.) व्रतोपायनं ब्रह्मवरणादीनां क्रियमाणानां पदार्थानाम् अङ्गम्। तस्य यत्र प्रकृतौ अनेके कालाः विहिताः तत्र ब्रह्मवरणात्पूर्वम् अपि एकः कालः। अस्मिन् पक्षे वरणादिषु अपकृष्यमाणेषु अङ्गत्वात् अपकृष्यते एव। अपकृष्टत्वात् च ब्रह्मवरणात् पूर्वम् एव कृतं भवेत्। पक्षान्तरस्य अवलम्बनेन यदि तदा न कृतं स्यात् तर्हि तदा इदानीं करणीयम्। ब्रह्मवरणादिषु अपकृष्यमाणेषु तदङ्गस्य व्रतोपायनस्य अपि अपकृष्यमाणत्वात् यदि व्रतोपायनं न कृतं तर्हि अग्निनिधानानन्तरं तत्कृत्वा कर्तव्यम्।

(6) "एकचोदनाच्च" सूत्रमिदं व्याख्यायताम्।

(उ.) साकमेधपर्वणि गृहमेधीयेष्टौ सायं पयसि चरुः कार्यः इति विधानमस्ति। गृहमेधीयहविःश्रपणार्थे पयसि सान्नाय्यधर्मा वत्सापाकरणदोहनादयः अनुष्ठेयाः उत न? इति प्रश्ने उदिते। न सान्नाय्यधर्माः अत्र अनुष्ठेयाः। तत्रैकः हेतुः सूच्यते- एकः एव अयं विधिः। "मरुद्भ्यो गृहमेधिभ्यः पयसि चरुः" अनेन विधिना एक एव यागः विधीयते। स यागद्वयविकृतिः कथं भवेत्। अर्थात् चरुद्रव्यकत्वात् अनेकदेवताकत्वात् च अग्नीषोमीयविकृतत्वम् अङ्गीकार्यम्। यदि पयसः अपि प्रदेयत्वम् अङ्गीक्रियते तर्हि सान्नाय्यविकृतत्वम् अपि आपतति। एकस्य यागस्य एकेन विधिना विहितस्य उभयविकृतत्वं भवितुम् अर्हति।

Scanned by CamScanner

(7) "गृहणं वा-चोदितत्वात्" सूत्रमिदं व्याख्यायताम्।

(उ.) एतेऽस्मिन् गृहणं मन्थस्य सिद्धान्तितम्। गृहणं मन्थस्य अवश्यं भवति। अत्र श्रुतिः प्रमाणम् - "अथ पितृभ्योऽग्नि-ष्वात्तेभ्यो निवान्यायै दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति"। अनया श्रुत्या अवहनन-पेषणयोः सदैव क्रियमाणत्वात् तावत्पर्यन्तं न विभागः भवितुमर्हति। अनन्तरं मन्थसम्पादनाय प्रकृतितः प्राप्तस्य समविभागस्य अनुवादः "० अर्धाः पिंषन्ति" इति श्रुतिवाक्ये विहितः। न तु एतावता चोदकप्राप्तस्य पृथग् विहितस्य हविषोऽर्थे गृहणस्य अभावः भवितुम् अर्हति। तस्मात् कारणात् मन्थार्थं गृहणं कर्तव्यम् एव।

(8) "उत्तरे निगमा यथेष्टं जोषणाश्रुतेः" सूत्रमिदं व्याख्यायताम्।

स्विष्टकृत्सूक्तवाकादिषु ये देवतासंकीर्तनरूपाः निगमाः सन्ति ते, ते यथारुचितं प्रतिलोमक्रमेणापि उच्चारणीयाः। कुतः? जोषणारूपश्रुतिसद्भावात् - "एवं या इष्टा देवता भवन्ति ताः सम्पश्यत्यसौ हविरजुषतासौ हविरजुषत"। इष्टाः च याज्यायां प्रतिलोमेनाभिधानात्। सा च याज्या "त्वष्टा रूपाणि ददती सरस्वती पूषा भगम्" इत्यादिरूपा। "अनुलोमा वा, चोदनागुणत्वात्" इत्यग्रिमे सूत्रे सिद्धान्तः प्रतिपादितः यत् अनुलोमा एव देवतासंकीर्तनरूपाः निगमाः भवन्ति न तु प्रतिलोमाः, चोदना (विधिः) - पाठक्रमस्य एव सर्वत्र गुणभावात्।

Scanned by CamScanner